Muniproktam Rudramantrajapopadesham

# मुनिप्रोक्तं रुद्रमन्त्रजपोपदेशाम्

## Document Information

Text title : Muniproktam Rudramantrajapopadesham

File name : muniproktaMrudramantrajapopadesham.itx

Category : shiva, shivarahasya, mantra, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 12 | 1-44||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# मुनिप्रोक्तं रुद्रमन्त्रजपोपदेशम्

(शिवरहस्यान्तर्गते भीमाख्ये)

मुनिरुवाच ।
श्रीरुद्रमन्त्रान्प्रजपन्नियतं भस्मधार्यपि ।
रुद्रमन्त्रान् जपन्विप्रो धयायेद्देवमुमापतिम् ॥ १॥

वेदानां मध्यगं(गः) साक्षाद्यजुषां मध्यगं(गः) परम्(रः) ।
शतशाखातं(स)त्वेतद्रुद्रमन्त्रः शिवप्रियः ॥ २॥

रुद्रप्रियकरं(रः) साक्षाद्रुद्रमन्त्रं(त्रः) श्रुतिःश्रुतम् ।
रुद्राध्यायार्थविज्ञानी पदार्थज्ञानवान्नरः ॥ ३॥

नमोऽन्तेन शिवं ध्यायन्सर्वपापैः प्रमुच्यते ।
नमोऽन्तेन च तद्रूपधारी शिवाय एव हि ॥ ४॥

ध्यायन्महेशं तद्रूपं पतीनां परमेश्वरम् (पतिमीश्वरम्) ।
सर्वेषामप्युमाकान्तं नितान्तं शान्तमव्ययम् ॥ ५॥

रुद्राध्यायगतैर्मन्त्रैर्नमोऽन्तैरुभयैरपि ।
एकद्वित्रिनमस्कारैर्ध्यायेद्देवं पिनाकिनम् ॥ ६॥

सर्वदेवाधिदेवेशं विश्वेशं रुद्रसूक्ततः ।
ध्यायन्मन्त्राञ्जपेद्रुद्रांस्तत्तदर्थावबोधतः ॥ ७॥

श्रीरुद्रमन्त्रं प्रजपेद्भस्मधारणपूर्वकम् ।
भस्मधार्यधिकारी च तथा रुद्राक्षधार्यपि ॥ ८॥

रुद्राध्यायजपे योग्यास्त एव भुवने द्विजाः ।
नान्यपुण्ड्रधराः सर्वे नाधिकारिण एव हि ॥ ९॥

प्रत्युतो रुद्रमन्त्रांश्च प्रजपन् पापभाग्भवेत् ।
(प्रत्युत प्रजपन्रुद्रमन्त्रांश्च पापभाग्भवेत्) ।

यस्तु रुद्राञ्जपेन्नित्यं ध्यायमानो महेश्वरम् ॥ १०॥

सर्वपापविशुद्धात्मा शिवत्वमुपगच्छति ॥ ११॥

स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा
मद्यं पीत्वा गुरुदारांश्च गत्वा ।
भस्मछन्नो भस्मशय्यां शयानो
रुद्रध्यायी मुच्यते सर्वपापैः ॥ १२॥

एकवारं जपन् रुद्रं पापैर्मुक्तो भविष्यति ।
द्विवारं च प्रजप्यैव रुद्रं ध्यायन्महेश्वरम् ॥ १३॥

गाणपत्यमवाप्नोति शिवस्य परमात्मनः ।
तृतीयवारं प्रपञ्छिवे संलीयते सदा ॥ १४॥

एकादशानुवारं यो रुद्रमन्त्रं जपेद्बुधः (द्विजः) ।
शं च मे इत्यादि च जपन् क्रमादेकादशावृतम् ॥ १५॥

जपाल्लिङ्गेऽभिषेको(कात्) वै शम्भोः प्रियतमो मतः ।
वस्त्रपूतेन तोयेन अविच्छिन्नां प्रकल्पयेत् ॥ १६॥

धारां प्रीत्या प्रकल्पेत शिवलिङ्गे द्विजोत्तमः ।
जपादप्युत्तमः सेकः श्रीरुद्राध्यायपूर्वकः ॥ १७॥

जपाद्दशगुणः प्रोक्तो ह्यभिषेको महेशितुः ।
चन्दनैर्बिल्वपत्रैश्च पूजयेदिन्दुशेखरम् ॥ १८॥

रुद्रैः स्तुवीत देवेशं साम्बं संसारभेषजम् ।
स्तुत्वा रुद्रैर्महादेव सन्निधौ गणपो भवेत् ॥ १९॥

रुद्रैर्होमं प्रकुर्वीत चरुणामधुसर्पिषा ।
नामभिर्देवदेवस्य स्वाहान्तैश्च पृथक् पृथक् ॥ २०॥

ग्रहारिष्टे समुत्पन्ने उत्पाते क्ष्मादिकम्पने ।
देशोपसर्गे दुर्भिक्षे राजचोराद्युपद्रवे ॥ २१॥

प्रजापशुमृतौ चापि जपहोमार्चनं चरेत् ।
रुद्रैर्मन्त्रैरयुतशो ध्यायन्देवं पिनाकिनम् ॥ २२॥

ब्राह्मणैः शाम्भवैरेव भस्मरुद्राक्षधारिभिः ।
कारयेद्विधिवद्राजा धनाढ्यो वापि कश्चन ॥ २३॥

गावो भूमिर्हिरण्याद्याः प्रदेयाः शक्तिसारतः ।
शाम्भवेभ्यः सदा रोगतापपापैः प्रमुच्यते ॥ २४॥

रुद्रमन्त्रजपे योग्याः शाम्भवा एव केवलम् ।
अतिरुद्रविधानं वा महारुद्रमथापि वा ॥ २५॥

कुर्यात्सर्वोपसर्गेभ्यो न भयं जायते क्वचित् ।
घृतधारां पातयेताविच्छिन्नां रुद्रमन्त्रतः ॥ २६॥

वह्नौ कुण्डे शिवं ध्यात्वा शाम्भवाष्टोत्तरैः शतैः ।
एकादशानुवृत्त्यैवं मण्डलं धनधान्यवान् ॥ २७॥

मुक्तः शिवमयो भूयादकामः कामवान् यदि ।
सर्वकामानवाप्नोति वत्सरान्ते न संशयः ॥ २८॥

गोष्ठे वापि नदीरीते रुद्रक्षेत्रे शतोत्तरम् ।
जप्यैव कर्म कृत्वापि फलं विन्देद्दशोत्तरम् ॥ २९॥

क्षीराभिषेकं लिङ्गे तु रुद्रमन्त्रैः समाचरेत् ।
न भूयस्स्तन्यपो मातुर्भविष्यति न संशयः ॥ ३०॥

यो रुद्रे वा नमस्कारं प्रदक्षिणमथापि वा ।
कुर्याच्छिवालये शम्भोः सन्निधौ स तु मुक्तिभाक् ॥ ३१॥

रुद्रमन्त्रैः शूलिनं यः स्तुवन्नर्तनमाचरेत् ।
स शम्भोर्गणपो भूयाद्वत्सरेण न संशयः ॥ ३२॥

अविमुक्ते शिवक्षेत्रेष्वन्येष्वपि यथा बलम् ।
रुद्रं जपन्प्रमुच्येत पापेभ्यो नात्र संशयः ॥ ३३॥

यो बिल्वमूले रुद्रांश्च जपेद्ध्यायन्महेश्वरम् ।
स कोटिरुद्रसाम्यस्य फलं लब्ध्वा विमुच्यते ॥ ३४॥

जाबाला आमनन्त्येव महिमां रुद्रजापिनः ।
किं जप्येनामृतमिति रुद्रैरेवेति सा श्रुतिः ॥ ३५॥

यतिश्च प्रजपेन्नित्यं वने वर्णी गृही तथा ।
यावन्नमोऽन्तं तु यतेरन्ये तु गृहमेधिनः ॥ ३६॥

यत्र स्थितो रुद्रजापी तत्र शम्भुः स्थितः सदा ।

तस्मै दत्तं शाम्भवाय दत्तं तच्छम्भवे सदा ॥ ३७॥

गां भूमिमथ वासो वा धनं धान्यं हिरण्यकम् ।
दत्वा शिवप्रसादस्य पात्रं श्रीरुद्रजापिने ॥ ३८॥

एकवारं जपन्रुद्रं तद्ग्रामे शान्तिमृच्छति ।
ग्रामे अस्मिन्ननातुरमिति मन्त्रार्थपारगः ॥ ३९॥

शतवारं तु नगरे पुरेऽयुतजपाद्भवेत् ।
तत्रस्थानां शुभं भूयाद्यत्र रुद्रजपो भवेत् ॥ ४०॥

कुम्भं संस्पृश्य यो रुद्रं सोदकं प्रजपन् द्विजः ।
स्नापयेच्चापि रोगार्त्तं रोगी रोगैः प्रमुच्यते ॥ ४१॥

वन्ध्या कुमारं सूते चातीव प्रेमास्पदं स्थिरम् ।
एवं रहस्यमनघं शतरुद्रमन्त्र-
जाप्याभिषेकनियमैः शिवपूजनेन ।
तस्मै प्रसीदति सदा शशिखण्डमौलि-
राखण्डलाजहरिवन्दितपादपीठः ॥ ४३॥

रुद्राध्यायजपानुरक्तहृदया रुद्राक्षभस्मादरा
जप्त्वा वाप्यभिषिच्य वा शशिमहाचूडोरुलिङ्गं सदा ।
मूढो वाप्यथपण्डितो यतिवरो भूयाच्छिवाग्रेसरो
विष्णुब्रह्ममरुद्गणार्चितपदो नन्दीशतुल्यो गणः ॥ ४४॥

॥ इति शिवरहस्यान्तर्गते ऋषिकश्यपप्रोक्तं रुद्राक्षमहिमावर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । भीमाख्यः अष्टमांशः । अध्यायः १२ । १-४४॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 12 . 1-44..

Notes:
Muni मुनि delivers Upadeśa उपदेश about the merits of Rudra Mantra Japa रुद्र मन्त्र जप, especially Rudrādhyāya Japa रुद्राध्याय जप.

Proofread by Ruma Dewan

*Muniproktam Rudramantrajapopadesham*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*